## त्यदादीनामः । (१०२/२६८)

[1]त्यद् इत्येवमादीनाम् [2]अकारादेशो भवति विभक्तौ परतः । त्यद्–स्यः, त्यौ, त्ये । तद् – सः, तौ, ते । यद् – यः, यौ, ये । एतद् – एषः, एतौ, एते । इदम् – अयम्, इमौ, इमे । अदस् – असौ, अमू, अमी । द्वि – [3]द्वौ । द्वाभ्याम्[4] । द्विपर्यन्तानां त्यदादीनामत्वमिष्यते (म.भा. ३.३०९) । इह न भवति, भवत् – भवान् । [5]सञ्ज्ञोपसर्जनीभूताः त्यदादयः पाठादेव [6]पर्युदस्ताः इति इह न भवति, [7]त्यद्, त्यदौ, त्यदः । अतित्यद्, अतित्यदौ, अतित्यदः । त्यदादिप्रधाने तु शब्दे भवत्येव, परमसः, परमतौ, परमते ॥

## किमः कः । (१०३/३४२)

किम् इत्येतस्य कः इत्ययमादेशो भवति [8]विभक्तौ परतः । कः, कौ, के । साकच्कस्याप्ययमादेशो भवति, तेनाकार एव किमो न विधीयते [9]'किमोऽत्' (५.३.१२/१९५९) इति ॥

## कु तिहोः । (१०४/१९५४)

[10]तकारादौ हकारादौ च विभक्तौ परतः किम् इत्येतस्य कु [11]इत्ययमादेशो भवति । कुतः । कुत्र । कुह । [12]तिहोः इति इकारः उच्चारणार्थः ॥

## क्वाति । (१०५/१९६०)

अति इत्येतस्यां विभक्तौ परतः किम् इत्येतस्य क्व इत्ययमादेशो भवति । क्व [13]गमिष्यसि । क्व [14]भोक्ष्यते । आदेशान्तरवचनम् ओर्गुण(६. ४. १४६/८४७)निवृत्त्यर्थम् । किमो ड्वत् इति प्रत्ययान्तरं न विधीयते, साकच्कार्थम् ॥

## तदोः सः सावनन्त्ययोः । (१०६/३८१)

त्यदादीनां तकारदकारयोः अनन्त्ययोः सकारादेशो भवति सौ परतः । त्यद् – स्यः । तद् – सः । एतद् – एषः । अदस् – असौ । अनन्त्ययोः इति किम् ? [15]हे स । [16]सा ॥

## अदस औ सुलोपश्च । (१०७/४३७)

अदसः सौ परतः [17]सकारस्य [18]औकारादेशो भवति सोश्च लोपो भवति । असौ ।

---

1. त्यदादीनामङ्गानाम् ह. 2. अकार इत्येवं भवति क. 3. द्वौ द्वौ क. 4. द्वयोः इत्यधिकम् ह. 5. सञ्ज्ञा नास्ति क. 6. निरस्ताः तेन क. 7. अतितत् । अतितदौ । अतितदः क. 8. विभक्तौ परतः नास्ति क. 9. किमोऽत् नास्ति क. 10. तकारहकारादौ ह. 11. इत्ययम् नास्ति क. 12. वाक्यमिदं नास्ति क. ब.ड. 13. गमिष्यति क. 14. भोक्ष्यसे इ.ह. 15. हे स्य क. 16. हे सा इ. 17. सकारस्य नास्ति ब. 18. अकारादेशः क.